आमैस्तैरेव यः सीधुः स च शीतरसः स्मृतः ॥
सीधुः पक्वरसः श्रेष्ठः स्वराग्निबलवर्णकृत् ।
वातपित्तकरो हृद्यः स्नेहनो रोचनो हरेत् ॥
विबन्धमेदःशोषार्शःशोफोदरकफामयान् ।
तस्मादल्पगुणः शीतरसः संलेखनः स्मृतः ॥”
अथासवस्य लक्षणं गुणाश्च ।
“यदपक्वौषधाम्बुभ्यां सिद्धं मद्यं स आसवः ।
आसवस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः ॥”
अथ नवपुराणमद्यगुणाः ।
“मद्यं नवमभिष्यन्दि त्रिदोषजनकं सरम् ।
अहृद्यं बृंहणं दाहि दुर्गन्धं विशदं गुरु ॥
जीर्णं तदेव रोचिष्णु क्रमिश्लेष्मानिलापहम् ।
हृद्यं सुगन्धि गुणवल्लघुस्रोतोविशोधनम् ॥”
अथ सात्त्विकानां मद्यं पिबतां चेष्टाविशेषाः ।
सात्त्विके गीतहास्यादि राजसे साहसादिकम् ।
तामसे निन्द्यकर्म्माणि निद्राञ्च मदिराचरेत् ॥”
आचरेत् कुर्य्यात् ।
“विधिना मात्रया काले हितैरन्नैर्यथाबलम् ।
प्रहृष्टो यः पिबेन्मद्यं तस्य स्यादमृतं यथा ॥
किन्तु मद्यं स्वभावेन यथैवान्नं तथा स्मृतम् ।
अयुक्तियुक्तं रोगाय युक्तियुक्तं यथामृतम् ॥”
अथ मद्यगन्धनाशनोपायः ।
“सुललवालगदजीरकधान्यकैला-
यश्चर्व्वयन् सदसि वाचमभिव्यनक्ति ।
स्वाभाविकं सुखजसुज्भति पूतिगन्धं
गन्धञ्च मद्यलशुनादिभवञ्च नूनम् ॥”
इति भावप्रकाशः ॥
अपि च ।
“प्रकृत्या मद्यमम्लुष्णमम्लञ्चोक्तं विपाकतः ।
सर्व्वसामान्यतस्तस्य विशेष उपदेक्ष्यते ॥
कृशानां सक्तमूत्राणां ग्रहण्यर्शोविकारिणाम् ।
सुरा प्रशस्ता वातेषु रक्तपित्तक्षयेषु च ॥
प्रसन्ना गुल्मवातार्शोविबन्धानाहनाशिनी ।
शूलप्रवाहिकाटोपकफवातार्शसां हिता ॥”
जगलो ग्राहिरूक्षोष्णः शोथघ्नो भक्तपाचनः ।
शोषार्शोग्रहणीदोषान् हन्त्यरिष्टः कफामयान् ॥”
अरिष्टो मद्यविशेषः ॥
“प्रायशोऽभिनवं मद्यं गुरु दोषसमीरितम् ।
स्रोतसां शोधनं जीर्णं दीपनं लघु रोचनम् ॥
हर्षणं प्रीणनं बल्यं मद्यं शोकश्रमापहम् ।
प्रागल्भ्यप्रतिभापुष्टिवीर्य्यतुष्टिस्वरप्रदम् ॥”
इति राजवल्लभः ॥
अन्यत् मद्यशब्दे द्रष्टव्यम् ॥
( वसुदेवपत्नी। यथा, श्रीमद्भागवते। ६। २४।
४५।
“पौरवी रोहिणी भद्रा मदिरा रोचना इला।
देवकीप्रमुखाश्चासन् पत्न्य आनकदुन्दुभेः ॥”)
मदिराक्षी, स्त्री, (मदिरे इव अक्षिणी यस्याः इति
अक्षि+“अक्ष्णोऽदर्शनात्।” ५।४।७६। इति
अच्। स्त्रियां ङीप्।) मत्तलोचना। यथा,—
“अविदितसुखदुःखं निर्गुणं वस्तु किञ्चि-
ज्जड़मतिरिह कश्चिन्मोक्ष इत्याचचक्षे।
मम तु मतमनङ्गस्मेरतारुण्यघूर्ण-
न्मदकलमदिराक्षीनीविमोक्षो हि मोक्षः ॥”
इत्युद्भटः ॥
( पुं, विराटराजस्य भ्राता। यथा, महा-
भारते। ४। ३०। ११—१२।
सवज्रायसगर्भन्तु कवचं तप्तकाञ्चनम्।
विराटस्य प्रियो भ्राता शतानीकोऽभ्यहार-
यत् ॥
सर्व्वपारशवं वर्म्म कल्याणपटलं दृढ़म्।
शतानीकादवरजो मदिराक्षोऽभ्यहारयत् ॥)
मदिरागृहं, क्ली, ( मदिराया गृहम्। ) मद्यस्य
गृहम्। मद्यसन्धानगृहम्। तत्पर्य्यायः। शुण्डा२
इत्यमरः। २। २। ८॥ गुण्डा ३। यथा,—
“भाण्डागारे विदुर्गञ्जं खनौ खञ्जा सुरागृहे।
मद्यभाण्डे स्मृता गुञ्जा गुञ्जा स्यात् काक-
कुञ्चिका ॥”
इति भरतधृतहड्डचन्द्रः ॥
मदिरासखः, पुं, (मदिरायाः सखा सगन्धत्वादिति।
मदिरा+सखि+“राजाहःसखिभ्यष्टच्।” ५।
४। ९१। इति टच्।) आम्रवृक्षः। इति
जटाधरः ॥
मदिष्ठा, स्त्री, (मदोऽस्या अस्तीति। मद्+इनिः।
इयमतिशयेन मदिनीति। इष्ठन्। इनोलोपः।)
मदिरा। इति हेमचन्द्रः। ३। ५६६ ॥
मदी, स्त्री, ( मृद्नाति चूर्णीकरोति कृष्टक्षेत्र-
लोष्टादिकमिति। मृद्-इन्। कृदिकारादिति
पक्षे ङीष्। पृषोदरादित्वात् साधुः।) चषक-
वस्तु। इति नानार्थे हेमचन्द्रः ॥ कृषकवस्तु।
इति वैश्यवर्गे जटाधरः ॥
मदीयं, त्रि, मम इदम्। आमार इति भाषा ॥
अस्मच्छब्दादीयप्रत्यये एकवचनार्थे मदादेशेन
निष्पन्नमिदम्। इति मुग्धबोधव्याकरणम् ॥
( यथा, कथासरित्सागरे। २८। ६०।
“हे देवतास्तपोंशेन मदीयेनैष भूपतिः ॥”)
मदोत्कटः, पुं, ( मदेन दानवारिणा उत्कटः।)
मत्तहस्ती। इत्यमरः। २। ८। ३४ ॥ (यथा,
महाभारते। ३। ६५। ८।
“ते तान् ग्राम्यगजान् दृष्ट्वा सर्व्वे वनगजास्तदा।
समाद्रवन्त वेगेन जिघांसन्तो मदोत्कटाः ॥”)
मदोत्कटा, स्त्री, ( मदेन मत्ततया उत्कटः उद्भ्रो
जनः अस्याः। स्त्रियां टाप्।) मदिरा।
इति राजनिर्घण्टः ॥ ( मदेन गर्व्वादिना उत्-
कटः। मदोन्मत्ते, त्रि।)
मदोद्धतः, त्रि, (मदेन मत्ततया उद्धतः।) मत्तः।
इति जटाधरः ॥ ( यथा, वेणीसंहारे १ अङ्के।
“सतृपचा मधुरगिरः प्रसाधिताशा मदोद्धता-
रम्भाः ॥”)
मदोदग्रा, स्त्री, (मदेन उदग्रा।) नारी। इति शब्द
माला ॥ ( मदोद्धते, त्रि। यथा, रघौ। ४। २२।
“मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः।”)
मद्गुः, पुं, ( मज्जतीति। मस्ज+“भृमृशीतृ-
चरित्सरितनिधनिमिमस्जिभ्य उः।” उणा०।
१। ७। इति उः।) पक्षिविशेषः। इत्यमरः।
२। ५। ३४ ॥ पानकौड़ि इति भाषा ॥
अस्य मांसगुणाः। वायुनाशित्वम्। स्निग्ध-
त्वम्। भेदकत्वम्। शुक्रकारित्वम्। रक्तपित्त-
नाशित्वम्। शीतत्वञ्च। इति राजवल्लभः ॥
( पर्णमृगभेदः। यथा, सुश्रुते सूत्रस्थाने ४६
अध्याये ॥
“मद्गुमूषिकवृक्षशायिका वकुशपूतिघासवानर-
प्रभृतयः पर्णमृगाः ॥”)
मद्गुरः, पुं, (माद्यति जलं प्राप्य हृष्यतीति।
मद्+“मद्गुरादयश्च।” उणा०। १। ४२।
इति उरच् निपातितश्च।) मत्स्यविशेषः।
इत्यमरः। १। १०। १६ ॥ मागुर इति भाषा।
( यथा। ललितविस्तरे। ३२०। ७।
“श्रमणो गौतमः श्यामको वत भो
श्रमणो गौतमो मद्गुरच्छविः।”)
अस्य गुणाः। मधुरत्वम्। स्निग्धत्वम्। संग्रा-
हित्वम्। शुक्रत्वम्। गुरुत्वञ्च। इति राज-
वल्लभः ॥ (यथाच भावप्रकाशपूर्व्वखण्डे द्वितीय-
भागे।
“मद्गुरो वातहृद्बल्यो वृष्यः कफकरो लघुः ॥”
वर्णसङ्करजातिविशेषः। यथा, महाभारते।
१३। ४५। ८३।
“निषादं मद्गुरं सूते दाशं नावोपजीविनम्।”
“मद्गून् मीनविशेषान् राति आदत्ते इति
रा+कः। तम्।” इति तट्टीकायां नीलकण्ठः।)
मद्गुरकः, पुं, ( मद्गुरः+स्वार्थे कन्! ) मद्-
गुरमत्स्यः। इति शब्दरत्नावली ॥
मद्गुरसी, स्त्री, ( मद्गौ पक्षिविशेषे रसो यस्याः
ङीप्।) शृङ्गी मत्स्यः। इति शब्दरत्नावली ॥
मद्यं, क्ली, ( माद्यति जनोऽनेन। मद्+“गदमद-
चरयमश्चानुपसर्गे।” ३। १। १००। इति करणे
यत्।) सुरा। इत्यमरः। २। १०। ४० ॥
( यथा, साहित्यदर्पणे।
“भिक्षो! मांसनिषेवणं प्रकुरुषे किं तेन मद्यं
विना
मद्यञ्चापि तव प्रियं प्रियमहो वाराङ्गनाभिः
सह।
वेश्याप्यर्थरुचिः कुतस्तव धनं द्यूतेन चौर्य्येण वा,
एतावानपि संग्रहोऽस्ति भवतो नष्टस्य कान्या
गतिः ॥”)
अस्य गुणपर्य्यायौ मदिराशब्दे द्रष्टव्यौ ॥ * ॥
तत् द्वादशविधं यथा पुलस्त्यः।
“पानसं द्राक्षमाधूकं खार्ज्जूरं तालमैक्षवम्।
माध्वीकं टाङ्कमाध्वीकं मैरेयं नारिकेलजम् ॥
समानानि विजानीयान्मद्यान्येकादशैव तु।
द्वादशन्तु सुरा मद्यं सर्व्वेषामधमं स्मृतम् ॥”
अनेन एकादशानां सुरात्वं निषेधयति मद्यशब्दो
मदहेतुद्रव्यवचनः। अस्मादेव वचनात् नतु
मद्यमात्रं सुराशब्दार्थः। यथा बृहस्पतिः
“गौड़ीं माध्वीं सुरां पैष्टीं पीत्वा विप्रः समा-
चरेत्।